ड़नैः । प्राप्य वाराणसीं पुण्यां सिद्धिक्षेत्रमनुत्तमम् । परिनिष्क्रान्तुमन्यत्र कस्य जन्तोर्मतिर्भवेत् । महादानेन चान्यत्र यत् फलं लभ्यते नरैः । अविमुक्ते तु काकिन्यां दत्तायां तदवाप्यते । एकः समस्तं येल्लिङ्गं तपस्तप्येत चापरः । तयोर्मध्ये तु स श्रेष्ठो यो लिङ्गं पूजयेदिह । तीर्थान्तरे गवां कोटिं विधिवद्यः प्रयच्छति । एकाहं यो वसेत् काश्यां काशीवासी तयोर्वरः । अन्यत्र ब्राह्मणानां तु कोटिं संभोज्य यत् फलम् । वाराणस्यां तदेकेन भोजितेन तदाप्यते । सन्निहित्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे । तुलापुरुषदानेन काश्यां भिक्षा समा भवेत् । ममेह परमं ज्योतिरापातालाद्व्यवस्थितम् । अतीत्य सत्यलोकादीननन्तलिङ्गरूपधृक् । पृथिव्यन्तःस्थितं लिङ्गमविमुक्तं स्मरन्ति ये । कलुषैस्ते विमुच्यन्ते महद्भिरिति निश्चितम् । अस्मिन् क्षेत्रे तु येनाहं दृष्टः स्पृष्टः समर्च्चितः । सम्प्राप्य तारकं ज्ञानं न स भूयोऽभिजायते । यो मामिह समभ्यर्च्य म्रियतेऽन्यत्र कुत्रचित् । जन्मान्तरेऽपि मां प्राप्य स विमुक्तो भविष्यति । इत्युक्त्वा क्षेत्रमाहात्म्यं द्विजानामग्रतो हरः । पश्यतामेव तेषान्तु तत्रैवान्तर्हितोऽभवत्" ।

**काशीसेतु** पु० त्रिस्थलीसेत्वन्तर्गते काशीमाहात्म्ययात्रादिविधायके ग्रन्थभेदे ।

**काशेय** पु० काश्यां भवः ढक् काशेर्नृपस्यापत्यं वा ढक् । काश्यां भवे स्त्रियां ङीप् । "भरतः खलु काशेयीमुपयेमे सार्व्वसेनीं सुनन्दां नाम तस्यां जज्ञे भुमन्युर्नाम" । भा० आ० ९५ ।

**काशीश(स)** न० काशिं प्रकाशमीष्टे ईश—क । (हीराकस) ख्याते उपधातुभेदे "काशीशं(सं) धातुकाशीशं (सं)पांशुकाशीश(स)मित्यपि । तदेव किञ्चित्पीतं तु पुष्पकाशीश(स)मुच्यते । काशीश(स)मम्लमुष्णञ्च तिक्तञ्च तुवरं तथा । वातश्लेष्महरं केश्यं रेतःकण्डूविषप्रणुत् । मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम्" भावप्र० काशीं दीप्तिं स्यति सो—क । दन्त्यान्तोऽप्यत्र भावप्र० ।

**काशू(सू)** स्त्री कश(स) ऊ णिच्च उज्ज्वलदत्तीये तालव्यमध्यपाठः पा० सूत्रे दन्त्यमध्यपाठः १शक्तिरूपास्त्रे २विकलवाचि च मेदि० ३वुद्धौ रोगे शब्दचि० ।

**काशू(सू)कार** पु० काशूं(सूं) विकलवाचं करोति कृ—अण्-उप—स० । गुवाकेश बूचि० तत्फलसेवने हि जिह्वाजाड्यात् वाचो वैकल्यं जायते इति तस्य तथात्वम् ।

**काशू(सू)तरी** स्त्री० ह्रस्वा काशूः (सूः) ह्रस्वार्थे ष्टरच् ङीष् । ह्रस्वे कासूनामास्त्रभेदे ।

**काश्म(श्व)री** स्त्री काश—वनिप् वनोरच नस्यान्तादेशः पृषो० वा वस्य मः । गाम्भार्य्याम् अमरः, फलेऽपि हरीत० अणोलुपि स्त्री । "विल्वान् कपित्थान् जम्बूश्च काश्मरीर्बदरीस्तथा" भा० व० १५८ अ० ।

**काश्मर्य्य** पु० काश्मरी+स्वार्थे ष्यञ् । गाम्भार्य्याम् अमरः "बदरेङ्गुदकाश्मर्य्यभल्लातकफलानि च" भा० आनु० ५३० । अयञ्च मधुरवर्गे पियालवीजकाश्मर्य्येत्याद्युपक्रमे "समासेन मधुरोवर्गः" सुश्रुते उक्तः ।

**काश्मीर** न० काश्मीरे भवः कच्छा० अण् । १पुष्करमूले अम० । २टङ्के ३कुङ्कुमभेदे मेदि० "काश्मीरदेशगे क्षेत्रे कुङ्कुमं यत् भवेद्धि तत् । सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम्" भावप्र० तत्स्वरूपाद्युक्तम् । काश्मीरद्रवसान्द्रदिग्धवपुषः" भर्त्तृ० । "काश्मीरागुरुकस्तूरीतिलहरीकाशीपुराधीश्वरी" अन्नदास्त० । ४काश्मीरदेशभवे त्रि० स्त्रियां ङीप् । "तेन तेनैवमापन्ना काश्मीरीव तरङ्गिणी" भा० वि० ९ अ० । सा च ५गाम्भार्य्यां भावप्र० । काश्मीरदेशानां राजा अण् । ६तद्देशराजे । "काश्मीराश्च कुमाराश्च घोरका हंसकायनाः । शिविस्त्रिगर्त्तयौधेया राजन्या मद्रकैकयाः" भा० स० ५२ । काश्मीरोऽभिजनोऽस्य सिन्ध्वा० अण् । पित्रादिक्रमेण ७तद्देशवासिनि त्रि० "काश्मीराः सिन्धुसौवीरा गान्धारादर्शकास्तथा" भा० भी० ९ अ० । "शूद्राभीराश्च दरदाः काश्मीराः पत्तिभिः सह" तत्रैव । "शारदामठमारभ्य कुङ्कुमाद्रितटान्तकः । तावत्काश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" इत्युक्ते ८देशभेदे च । "काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम्" सुश्रु० । काश्मीरमण्डलतीर्थादिकथा भा० व० १३० अ० यथा "एषा रम्या विपाशा च नदी परमपावनी । अत्र वै पुत्त्रशोकेन वशिष्ठो भगवानृषिः । बद्ध्वात्मानं निपतितो विपाशः पुनरुत्थितः । काश्मीरमण्डलञ्चैतत् सर्व्वपुण्यमरिन्दम ! । महर्षिभिश्चाध्युषितं पश्येदं भ्रातृभिः सह । यत्रोत्तराणां सर्व्वेषां महर्षीणां नाहुषस्य च । अग्नेश्चैवात्र संवादः काश्यपस्य च भारत ! । एतद्द्वारं महाराज ! मानसस्य प्रकाशते । वर्षमस्य गिरेर्मध्ये रामेण श्रीमता कृतम् । एष वातिकखण्डो वै प्रख्यातः सत्यविक्रम ! । नात्यवर्त्तत यद्द्वारं विदेहादुत्तरञ्च यः । इदमाश्चर्य्यमपरं देशेऽस्मिन् पुरुषर्षभ ! । क्षीणे युगे तु कौन्तेय ! शर्व्वस्य